This question paper consists of 37 questions and 8 printed pages.
अस्मिन् प्रश्नपत्रे 37 प्रश्नाः 8 मुद्रित पृष्ठाः च सन्ति ।

| Roll No. अनुक्रमाङ्कः अङ्केषु | | | | | | | | | | | | | Code No. 42/S/A/S कूट सं. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|

# संस्कृतम्
# SANSKRIT
# (209)

**Day and Date of Examination**
(परीक्षादिवसः दिनाङ्कश्च) ______________________

**Signature of Invigilators** 1. ______________________
(निरीक्षकहस्ताक्षरद्वयम्)
2. ______________________

**सामान्य अनुदेशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति ।

3 वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथकरूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।

4 वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

5 उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

6 स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **42/S/A/S** अवश्यं लेखनीया ।

# संस्कृतम्
# (209)

समय : होरात्रयम् पूर्णाङ्काः : 100

निर्देशाः :

1 अस्मिन् प्रश्नपत्रे सप्तत्रिंशत् प्रश्नाः सन्ति ।

2 प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

3 **सर्वे** प्रश्नाः अनिवार्याः ।

1 'प्रेरणा' इति पाठानुसारं लिखत : 1

बोपदेवस्यजन्म कस्मिन प्रदेशे अभवत्?

(A) हिमाचलप्रदेशे (B) बंगप्रदेशे

(C) असमप्रदेशे (D) उत्तरप्रदेशे

2 'त्याज्यं न धैर्यम्' इति पाठे इदं प्रीतिलक्षणं नास्ति 1

(A) ददाति–प्रतिगृह्णाति (B) गुह्यमाख्याति–पृच्छति

(C) नयति–आनयति (D) भुङ्क्ते–भोजयते

3 'सदाचारः' इति पाठे किं केन न रक्ष्यते? 1

(A) कुलं–वृत्तेन (B) रुपं मृजया

(C) धर्मः सत्येन (D) वृत्तं वित्तेन

4 'आसीत्' इति क्रियापदस्य बहुवचने किं रुपं भविष्यति? 1

(A) अस्ति (B) आसन्

(C) आस्ताम् (D) आस्म

5 यक्षयुधिष्ठर संवादानुसारम् आतुरस्य किं मित्रम् ? 1

(A) सार्थः (B) भार्या

(C) भिषक् (D) दानम्

6 अधोलिखितेषु किं वाक्यम् अशुद्धम्? **1**

(A) इदानीं वयं शून्यस्य महत्त्वं जानन्ति

(B) अस्मिन् ग्रन्थे 121 श्लोकाः चतुर्षु पादेषु विभक्ताः

(C) सूर्यादीनां सञ्चारःभ्रमसूलः

(D) प्रकृत्या वृत्ताकारा एव भूः

7 अस्मिन् पदे एव ल्यप् प्रत्ययःअस्ति **1**

(A) प्रवेशय (B) प्रविश्य

(C) आदेशय (D) अभिवादय

8 एतत् पदम् अव्ययं नास्ति **1**

(A) कर्तुम (B) प्रातः

(C) वयम् (D) कुशलः

9 सर्वाणि इन्द्रियाणि कदा पीडितानि अभवन तेन च किं सिद्धम् अभवत्? **1+1=2**

10 'मृज्जलशिखिवायुमयो भूगोलः' इत्यत्र 'अग्नि' इति कृते कःशब्दःप्रयुक्तः? **1+1=2**
पृथिवी शब्दस्य च कः पर्यायः?

11 'अम्ब! ह्यानीतः तव चिराभिलषितः मानुषः' इति वाक्ये 'अम्ब' इति सम्बोधनं कस्ये **1+1=2**
प्रयुक्तम्, कश्च पुरुषः ह्यानीतः?

12 कैः आक्रम्यमाणोऽपि विद्वान कस्मात् न चलेत ? इयं शिक्षा कस्मात् प्राप्यते? **1+1=2**

13 बुद्धिपूर्व समालोक्य दूरतो गुणदोष्ठः आरभते तदा कर्म शुभं वा यदि वेतरत। इति पद्ये **1+1=2**
'दृष्ट्वा', 'अशुभम्' इति अर्थे किं पद द्वयं प्रयुक्तम्?

14 इयं च दृश्यते गंगा $\frac{1}{2} \times 4 = 2$

पूज्या त्रिपथगा नदी।' इति पद्यांशे गंगायाः कृते किं विशेष नद्वर्य प्रयुक्तम् त्रयोः अर्थौ च कौ?

15 अधोलिखित वाक्यद्वये प्रत्ययं प्रयुज्य रिक्तस्थानपूर्ति कुरुत **1+1=2**

(अ) राजा मौनं _________ (धृ+क्त्वा) अचलत्।

(आ) कविरत्नः देबं _________ (दृश+तुमुन्) इच्छति।

16 रिक्तस्थाने क्रियापदं योजयत **1+1=2**

(अ) पुत्र! दीर्घायुः _________ । (भू)

(आ) अहं पितृचरणौ _________ । (नम्)

17 अधोलिखितवाक्ये कानि चत्वारि अव्ययपदानि प्रयुक्तानि? $\frac{1}{2} \times 4 = 2$

अस्य विदुषः सम्माने एव भारते निर्मितस्य उपग्रहस्य नाम अपि भास्करः इति कृतम्?

18 अधोलिखितवाक्ये तृतीयान्तपदद्वयं चित्वा लिखत **1+1=2**

अद्य प्रभाते मत्स्यजीविमिर्जालेन तज्जलाशयम्

आलोड्य तस्याः निर्भत्स्यतां नीतम्।

19 'करुणापराः हि साधवः' इति पाठे दैत्यगणाः किमर्थं शक्रं प्रति ईर्ष्यालवः जाता? ते केन आक्रान्तवन्तः? कुत्र च तैः सह शक्रस्य युद्धम अभवत्? **1+1+1=3**

20 भोजनान्ते किं पेयम्? वासरान्ते किं पिबेत्? निशान्ते च कस्य पानम् श्रेयस्करम्? **1×3=3**

21 अनागतं यः कुरुते सः शोभते इति पाठे दधियुद्धः शृगालः कथं जानाति यत् गुहायां सिंहः अस्ति सः च गुहां किं वदति? 1+2=3

22 'गीतामृतम्' इति पाठात् सात्त्विक–राजसिक–तामसिक–आहारस्य एकम् एकम् उदाहरणं लिखत। 1×3=3

23 शङ्कराचार्यः कस्य दर्शनस्य प्रचारम् अकरोत्? सःकं शास्त्रार्थे जितवान्? कस्य ग्रन्यस्य च रचनामकरोत्? 1+1+1=3

24 चन्द्रकेतोः लवस्य मध्ये के गुणाः समाना? 'कथं' मृदुशरीरेस्मिन् शराः भोक्तव्याः? इति कः कथयति? कः च अत्र प्रसङ्गः? 1+1+1=3

25 स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव॥ 1+2

पुनर्ददताऽघ्नता जानता संगमेमहि॥

इति पद्ये 'स्वस्ति' पदस्य विशेष्यं किम्?

वयं कीदृशैः पुरुषैः सह संगतिं कुर्याम ? कौच निरन्तरं कल्याणं कुरुत?

26 कीदृशः घटः शब्द न करोति? कीदृशः च करोति? अस्याः पंक्तयाः कः अभिप्रायः? 1×3=3

**27** अधोलिखितपद्यस्य अन्वये रिक्तस्थानपूर्तिं कुरुत। **1×3=3**

जीवनं सर्वप्राणिनां जलाशयसुनिर्भरम्।

संरक्ष्यं वर्धनीयं च जलं रक्षति रक्षितम्॥

**अन्वयः**

सर्वप्राणिनाम् जीवनम् ________ । संरक्ष्यम् ________ च। ________ जलम् रक्षति ॥

(i) (ii) (iii)

**28** अधोलिखितां पक्तिं पठित्वा प्रदत्रप्रश्नान **1×3=3**

गुरुपदेशश्च पुरुषाणाम् अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्, विशेषेणतुराजाम् यतः विरलाः हि तेषामुपदेष्टारः।

**प्रश्नाः**

(i) गुरुपदेशः कीदृशं स्नानम् अस्ति ?

(ii) केषाम् उपदेष्टारः स्वल्याः एव ?

(iii) गुरुपदेशः कस्य प्रक्षालनं करोति?

**29** अधोलिखित गद्यांशं पठित्वा प्रदत्रप्रश्नान उत्तरत **1+1+1=3**

अन्येद्युः यदा सः भिक्षुकः यथापूर्व फलम् आनीतवान् तदा नृपतिः तम् अपृच्छत् ''मो भिक्षो! कस्मात् त्वम् एवं करोषि? सत्यं वदं।'' ततः सः राजानं रहसि नीत्वा निवेदितवान्–राजन्! अहं मन्त्रसिद्धिम् इच्छामि।

**प्रश्नाः**

(i) कः यथापूर्व फलम् आनीतवान्?

(ii) फलस्य किं वैशिष्ट्यम् आक्षीत्?

(iii) 'एकान्ते' इति अर्थे किं पदमत्र प्रयुक्तम्?

30 अधोलिखितं पद्यांशं पठित्वा प्रदत्रप्रश्नान उत्तरत 1+1+1=3

अधिकारः भारतीयानां स्वातंत्र्यं चारित्त जन्मतः।

तत्प्राप्तये पतिष्येऽहं शापादपि शरादपि॥

**प्रश्नाः**

(i) भारतीयानाम् अधिकारः कः ?

(ii) तस्य अधिकारस्य प्राप्तये कः प्रयत्नं कर्तु निश्चिनोति ?

(iii) 'प्रयत्नं करिष्ये' इति अर्थे किं पदमत्र प्रयुक्तम ?

31 अधोलिखितनाट्यांशं पठित्वा प्रदत्रप्रश्नानः उतरत 1×3=3

कण्व : वत्से ! भर्तुः बहुमता भव। सम्राजं सुतम् आप्नुहि।

गौतमी : भगवन् ! वरःखलु एषः न आशीः।

कण्व : वत्से ! इतः अग्निं प्रदक्षिणी कुरुष्व।

एते वह्नयः दुरितम् अपध्नन्तः

त्वां पाठयन्तु। प्रतिष्ठस्य इदानीम्।

**प्रश्नाः**

(i) कण्वस्य वचनं कथं गौतमी वरः इति मन्यते ?

(ii) वह्नयः कस्य नाशं कुर्वन्ति ?

(iii) कण्वः शकुन्तलां कुत्र प्रस्थातुम वदति ?

32 भारतस्य पवित्रतमायाः गंगाया वैशिष्ट्यम् त्रिस् वाक्येषु लिखत। 3

**33** अधोलिखितेषु कस्यचिदेकस्य विशिष्टं योगदानं षड्वाक्येषु वर्णयत **1×6=6**

(i) भासः (भातुराज्ञागरीयसी)

(ii) विष्णुशर्मा (अनागतं यः कुरुते सःशोभते)

(iii) आदिशङ्कराचार्यः (त्याज्यं न धैर्यम्)

**34** अधोलिखित कथासु एकस्याः कथाया : सारं षड्वाक्येषु लिखत **1×6=6**

(i) अनुत्मअपि ऊहति पष्डितो जनः

(ii) प्राणस्य श्रेष्ठत्वम्

(iii) करुणापराः हि साधनः

**35** कस्यचिदेकस्य चारित्रचित्रणं षड्वाक्येषु कुरुत **1×6=6**

(i) चन्द्रकेतुः

(ii) धारानगर्याः राजा भोजः

(iii) शकुन्तला

**36** कमपि एकं विषयअधिकृत्य षड्वाक्येषु एकमनुच्छेदं लिखत **1×6=6**

(i) वेदज्ञानम्

(ii) करुणा

(iii) सत्सङ्गतिः

**37** शिक्षकदिवस्य महत्त्वमधिकृत्य स्वविद्यालये आयोजितं कार्यक्रमं वर्णयन् स्वपितां प्रति एकं पत्रं लिखत। **1+1+2+1+1=6**

---